## अध्याय :- २१ chapter-21

नारद उवाच ।।[१]

तमालोक्य पलायंतं विध्वस्तध्वजकार्मुकम् ।
दैत्यांश्च मुदितानिंद्रः कर्तव्यं नाध्यगच्छत ।। १

अथायान्निकटं विष्णोः सुरेशस्त्वरयान्वितः ।।
उवाच चैनं मधुरमुत्साह परिबृंहितम् ।। २

किमेभिः क्रीडसं देव दानवैर्दुष्ट मानसैः ।।
दुर्वनि[२] लब्धरंध्रस्य [३]पुरुषास्य कृतः क्रियाः ।। ३

शक्तेनोपेक्षितो नीचो मन्यते बलमात्मनः ।।
तस्मान्न नीचं मतिमानुपेक्षेत कथंचन ।। ४

अथाग्रेसर संपत्या रथिनो जयमायुयुः ।।
कस्ते सखाभवत्पूर्वं हिरण्याक्षवधे विभो ।। ५

हिरण्यकशिपुर्दैत्यो वीर्यशाली मदोद्धतः ।।
[४]प्राप्य त्वां तृणवन्नष्टस्तत्र कोऽग्रेसरस्तव ।। ६

[५]पूर्व प्रतिबला दैत्या मधुकैटभसन्निभाः ।।
निविष्टास्त्वां तु संप्राप्य शलभाइव पावकम् ।। ७

---

१ ब. श्री नारद उ० ।
२ ब. दुर्जनि
३ अ. (पुरु...... याः) प्रतौ नष्ट पृष्ठाः प्रतिः ।
४ अ. त्वां प्राप्य इति स्यात् ।
५ पूर्व प्रतिबला इत्ययं अ. पुस्तके लुप्तम् ।

[1]युगे युगे च दैत्यानां त्वत्तो नाशोऽभवद्धरे ।।
तथैवाद्येह भीतानां त्वं हि विष्णो सुराश्रयः ।। ८

एवं संनोदितो विष्णुर्व्यवर्धत महाभुजः ।।
बलेन तेजसा ऋद्धया सर्वभूताश्रयोऽरिहा ।। ९

अथोवाच सहस्राक्षं केशवः प्रहसन्निव ।।
एवमेतद्यथा प्राह भवानस्मद्गतं वचः ।। १०

त्रैलोक्य दानवान्सर्वान्दग्धुं शक्तः क्षणादहम् ।।
दुर्जयस्तारकः किं तु मुक्त्वा सप्त दिनं शिशुम् ।। ११

महिषाश्चैव शुंभश्च उभौ वध्यौ च योषिता ।।
जंभो दुर्वाससा शप्तः शक्रवध्यो भवानिति ।। १२

तस्मात्त्वं दिव्य वीर्येण जहि जंभं मदोत्कटम् ।।
अवध्यः सर्वभूतानां त्वामृते स तु दानवः ।। १३

मया गुप्तो रणे जंभो जगत्कंटकमुद्धर ।।
तद्वै कुंठवचः श्रुत्वा सहस्राक्षोऽमरारिहा ।। १४

---

१ अ. युगे..... दैत्यानां पर्यन्तं त्रुटितं ।

समादिशत्सुराध्यक्षान्सैन्यस्य रचनां प्रति ॥
ततश्चाभ्यर्थितो देवैर्विष्णुः सैन्यम कल्पयत् ॥ १५

यत्सारं सर्वलोकस्य वीर्यस्य तपसोऽपि च ॥
तदेकादश रुद्रांश्च चकाराग्रे सरान्हरिः ॥ १६

*१ व्यालीढांगा महादेवा बलिनो नीलकंधराः ॥
चंद्रखंड त्रिपुंडाश्च पिंगाक्षाः शूल[२] पाणयः ॥ १७

पिंगोत्तुंग जटाजुटाः सिंह चर्म वसायिनः ॥
भस्मोद्धूलित गात्राश्च भुजमंडल भैरवाः[३] ॥ १८

कपाली ~~अजकके~~ शादयो रुद्रा विद्रावित महाऽसुराः ॥
कपाली पिंगलो भीमो विरुपाक्षो विलोहितः ॥ १९

अजकः शासनः शास्ता शंभुश्चंद्रो भवस्तथा ॥
एत[४] एकादशानत बला रुद्राः प्रभाविनः ॥ २०

अपालयंत त्रिदशान्विगर्जंत इवांबुदाः ॥
हिमाचला भे महति कांचनां बुरुहस्त्रजि *५ ॥ २१

---

*१ अ. व्यालान्धांगा महावेगा बलि * इति स्यात् ।
२ अ. धारिणः ३ ब. भैरवा
४ अ. ब. एते
*५ After the sloka No.21 there are three lines missing from the M.S.S. 'A'

प्रंचचल........मंडिते ।
ऐरावते........ आस्थितः ।
महामद........ क्रतुः ॥

[1] प्रंच चल महाहेम घंटा संहित मंडिते ।।
[2] ऐरावते चतुर्दंते मत्तमातंग आस्थितः ।। २२

[3]महामदजलस्त्रावे कामरूपे शतक्रतुः ।।
तस्थौ हिमगिरेः श्रृंगे भानुमानिव दीप्तिमान् ।।
तस्यारक्षात्पदं सर्व्वं मारुतोऽमित विक्रमः ।। २३

जुगोषापरमग्निश्च ज्वालापूरित दिङ्मुखः ।।
पृष्टरक्षोऽभवद्विष्णुः समरेशः शतक्रतौः ।। २४

आदित्या वसवो विश्वे मरुतश्चाश्विनावपि ।।
गंधर्वा राक्षसा यक्षाः संकिंनर महारगाः ।। २५

कोटिशः कोटिशः कृत्वा वृंदं चिह्नोपलाक्षितम् ।।
विश्रावयंतः स्वां कीर्तिं बंदिवृन्देः पुरः सरैः ।। २६

चेलुर्दैत्यवधे[4] दप्ता नानावर्णायुधध्वजा[5] : ।। २७

शतक्रतौ रमरैनि कायपालिता पताकिनी याननिनाद नादिता ।।
सितोन्नत ध्वजपट कोटिमंडिता बभूव सा दितिसुत शोकवर्धिनी ।। २८

---

१ २ ३ अ. प्रतौ नास्ति ।
४ ब. चतुर्दैत्यवधे
५ ब. ध्वजः

आयांतीं तां[1] विलोक्याथ सुरसेनां गजासुरः ।।
गजरूपी महांश्चैव संहारां भोधि विक्रमः ।। २९

परश्वधायुधो दैत्यो दशनोष्ठक संपुटः ।।
ममर्द चरणो देवांश्चैव क्षेपान्यान्करेण च ।। ३०

परान्परशुना जघ्ने दैत्येंद्रो रौद्र विक्रमः ।।
तस्यैवं निघ्नतः क्रुद्धा देवगन्धर्व किंनराः ।। ३१

मुमुचुः संहताः सर्वे चित्रशस्त्रास्त्र संहितम्[2] ।।
परश्वधांश्च चक्राणि भिण्डिपालान्समुद्गरान् ।। ३२

कुन्तान्प्रासांछरास्तीक्ष्णान्मुद्गरांश्चापि दुःसहान् ।।
तान्सर्वान्सोग्रसदैत्यो युथपः कवलामिय ।। ३३

कोपस्फुरित दृष्ट्राग्रः करसूफेटाटेन नादयन् ।।
सुरान्निघ्नंश्च चाराजी दुष्प्रेक्ष्यः सोऽथ दानवः ।। ३४

यस्मिन्यस्मिन्निन पतति सुरवृंदे गजासुरः ।।
तस्मिंस्तस्मिन्महाशब्दो हाहाकारो[3] [4]व्यजायत ।। ३५

---

१ अ. प्रतौ नास्ति ।
२ अ. संहतिं
३ अ. कारः ब. कार
४ ब. प्रजायत

अथ विद्रमानं तद्बलं प्रेक्ष्य समंततः ।।
रुद्राः परस्परं प्रोचुर हुंकारोत्थितार्चिषाः ।। ३६

भोभो गृहणांत दैत्येंद्रं भिंदतैनं महाबलाः ।।
कष्तैनं शितैः शूलैर्भज्जतैनं हि मर्मसु ।। ३७

कपाली वाक्यामाकर्ण्य शूलं[1] शितशितं मुखे[2] ।।
संमाजूर्य वामहस्तेन संरंभाद्विवृतेक्षणः ।। ३८

प्रोत्फुल्लारुण नीलाब्ज संहतिः सर्वतो दिशः ।।
अथागाद्भृकुटीवक्त्रो दैत्येंद्राभिमुखो रणे ।। ३९

द्रढेन मुष्टिबन्धेन शूलं विष्टभ्य निर्मलः[3] ।।
जधान कुम्भदेशे तु कपाली गजदानवम् ।। ४०

ततो दशापि ते रुद्रा निर्मलायोमयै रणे ।।
जघ्नुःशुलैस्तु दैत्येंद्रं शैलवर्ष्माणि माहवे ।। ४१

सुस्त्राव शोणितं पक्ष्मात्सर्वस्त्रोतस्सु तस्य वै ।।
शूल रक्तेन रुद्रस्य शुशुभे गजदानवः ।। ४२

---

१ अ. शूलस्य
२ अ. ब. मुखं
३ अ. ब. निर्मलं

प्रोतफुल्लामल नीलाब्जं शरदीवामलं सरः ।।
भस्मशुभ्र तनुच्छाये रुद्रे हंसैरिवावृतम् ।। ४३

क्रुद्धं कपालिन दैत्यः प्रचलत्कर्णपल्लवः ।।
भवं[1] च दन्तैर्बिभिदे नाभिदेशे गजासुरः ।। ४४

दृष्ट्वा नुरक्तं रुद्राभ्यां नवरुद्रास्ततो द्रुतम् ।।
विव्यधुर्वि ~~सर्वे~~- शिखैः शूलैः शरीरममरद्विषाः ।। ४५

ततः कपालिनं त्यक्त्वा भवं[2] चासुरपुंगवः ।।
वेगेन कुपितो दैत्यो नव रुद्रानुपाद्रवत् ।। ४६

ततोऽसौ शूलयुद्धेन श्रममासादितो यदा[3] ।।
तदा कपाली जग्राहकरमस्यामरद्विषाः ।। ४७

भ्रामयामास चातीव वेगेन च गजासुरम् ।।
दृष्ट्वा श्रमातुरं दैत्यं किंचिच्च्यावितजीवितम् ।। ४८

निरुत्साहं रणे तस्मिन्गतयुद्धोत्सवोऽभवत्[4]।।
ततो भ्रमत एवास्य चर्म उत्कृत्य भैरवम् ।। ४९

---

१ अ. प्रतौ कथं पाठः ।
२ अ. प्रतौ कथं पाठः ।
३ अ. ब. यथा
४ अ. भ्रमत्

स्त्रवत्सर्वांगिस्क्रोधं चकारांबरमात्मनः ।।
तुष्टुवुस्तं तदा देवा बहुधा बहुभिः स्तवैः ।। ५०

ऊ चुश्चैनं च यो हन्यात्स म्रियते ततस्तवसौ ।।
दृष्ट्वा कपालिनो रूपं गजचर्मांबरावृतम् ।। ५१

विनेसुर्दुदु वुर्जघ्नुनर्नि पेतुश्च सहस्त्रशः ।।* १
एवं विलुलिते तस्मिन्दानवेन्द्रे महाबले ।। ५२

गजं मत्तमथारुह्य शतदुन्दुभिनादितम् ।।
निमिरभ्यपतत्तूर्णं सुरसैन्यानि लोडयन्[२] ।। ५३

यायां निमिगजो याति दिशं तां तां सवाहनाः ।।
दुद्रुवुश्च कुशदेवा भयेना कंपिता मुहुः ।। ५४

गन्धेन सुरमातंगा दुद्रुवुस्तस्य हस्तिनः ।।
पलायितेषु सैन्येषु सुराणां पाकशासनः ।। ५५

तस्थौ दिकपालकैः सार्धमष्टभिः केशवेन च ।।
संप्राप्तस्तस्य मातंगो यावच्छक्रगजं प्रति ।। ५६

---

* १ After this line, there is written in the M.S.S.'A'

इति श्री स्कंदपुराणे कुमारिकाखंडे गजासुरवधः ।।

२ अ. लोडयतु

तावच्छक्रगजो भीतो मुक्त्वा नादं सुभैरवम् ।।
ध्रियमाणोऽपियत्नेन चकोर इव तिष्ठति ।। ५७

पलायति गजे तस्मिन्नारूढः पाकशासनः ।।
विपरीतमुखं युद्धं दानवेन्द्रेण सोऽकरोत् ।। ५८

शतक्रतुस्तु[1] ऽशूलेन निमिं[2] वक्षस्य[3] ताडयत् ।।
गदया दंतिनं तस्य गल्लदेशेहनद्भृशम् ।। ५९

तं प्रहारमचिंत्यैव निमिर्निर्भयऽपौरुषाः ।।
ऐरावतं कटीदेशे[4] मुद्गरेणाभ्य ताडयत् ।। ६०

स हतो मुद्गरेणाथ शक्रकुञ्जर आहवे ।।
जगाम पश्चात्पम्ध्यां च पृथिवीं भूधराकृतिः ।। ६१

लाधवात्क्षिप्रमुत्थाय ततोऽमरमहागजः ।।
रणादपससर्पाथ भीषितो निमिहस्तिना ।। ६२

ततो वायुर्ववौ रूक्षो बहुशर्करपांशुलः ।।
सम्मुखो[5] निमिमातंगोऽकंपनोऽचल कंपनः ।। ६३

---

१ अ. शतुक्रतु
२ ब. निमी
३ ब. वक्ष्यस्य
४ ब. तटी....
५ अ. सन्मुखी

धनेशोऽपि गदां गुर्वीं तस्य दानवहस्तिनः ।।
मुमोच वेगान्न्यपतत्सा गदा तस्य मूर्धनि ।। ६४

गजो गदानिपातेन स तेन परिमूर्छितः ।।
दंतैर्भित्वा धरां वेगात्पपाताचलसन्निभः ।। ६५

पतिते च गजे तस्मिन्सिंहनादो महानभूत् ।।
सर्वतः सुरसैन्यानां गजबृंहितः [1] ।। ६६

हेषारवेण चाश्वानां रणास्फोटैश्च धन्विनाम् ।।
गजं तं निहतं दृष्ट्वा निमिं चापि पराङ्मुखम् ।। ६७

सुराणां सिंहनादं च सन्नादित दिगंतरम् [2] ।।
जंभो जज्वाल कोपेन संदीप्त इव पावकः [3] ।। ६८

ततः स कोपरक्ताक्षो धनुष्यारोप्य सायकम् ।।
तिष्ठेति चाब्रवीत्तारं सारथिं चाप्यनंदयत् ।। ६९

तमायांतमभिप्रेक्ष्य धनुष्याहित सायकम् ।।
शतक्रतुरदीनात्मा द्रढमादत्त कार्मुकम ।। ७०

---

१ गजबृंहितः अ. प्रतौ इत्ययं पाठः नास्ति ।
२ अ. दिगंबरं
३ ब. पालकः

बाणं च तैलधौताग्रमर्धचंद्रम जिह्मगम् ।। ७१

तेनास्य सशरं चापं चिच्छेद बलवृत्रहा ।।
अपास्य तद्धनुश्छिन्नं जंभो दानवनंदनः ।। ७२

अन्यत्कार्मुकमादाय वेगवद्भार साधनम् ।।
शरांश्चाशीविषाकारांस्तैलधौतान जिह्मगान् ।। ७३

शक्रं[1] विव्याध दशभिर्जत्रुदेशे च पत्रिभिः ।।
त्द्धृदये च त्रिभिश्चैव द्वाभ्यां च स्कन्दयोर्द्वयोः ।। ७४

~~सक्रोऽपि दानवेन्द्रस्तु सरांश्छक्रभुजेरितान् ।।~~
शक्रोऽपि दानवेन्द्राय बाणजालम भीरयन् ।।
अप्राप्तान्दानवेन्द्रस्तु शरांश्छक्रभुजेरितान् ।। ७५

चिच्छेद शतधा/काशे शरैरग्नि शिखोपमैः ।।
ततश्च शरजालेन देवेन्द्रो दानवेश्वरम् ।। ७६

आच्छादयत यत्नेन वर्षास्विव घनैर्नभः ।।
दैत्यो/पि बाणजालेन विव्याध सायकैः शितैः ।। ७७

---

१ ब. शिक्रं

यथा वायुर्धनाटोपं यदवार्यं दिशां मुखे ।।
शक्रोऽपि क्रोधसंरंभान्न विशेषायते यदा[1]।। ७८

दानवेन्द्रं तदा चक्रे गंधर्वास्त्रं महाद्भुतम् ।।
ततोऽस्य तेजसा व्याप्तम भूद्गमन गोचरम् ।। ७९

गन्धर्व नगरैश्चापि नानाप्राकार तोरणैः ।।
मुंचद्भिरद्भुताकारैर वृष्टिं समंततः ।। ८०

तयास्त्र वृष्टया दैत्यानां हन्यमाना महाचमूः ।।
जंभं शरणमागच्छ त्राहित्राहीति भारत ।। ८१

ततो जंभो महावीर्यो विनद्य प्रहसन्मुहुः ।।
स्मरन्साधु समाचारं दैत्यानाम भयं ददौ ।। ८२

ततोऽस्त्रं मौशलंनाम मुमोच सुमहा[2]भयम् ।।
अथो[3]ग्रमुसलैः सर्वमभवत्पूरितं जगत् ।। ८३

तैश्च भग्नानि सर्वाणि गंधर्वनगराणि च ।।
अथोग्रैक प्रहारेण [4]रथमश्वं गजं सुरम् ।। ८४

---

१ अ. ब. तदा
२ अ. ब. भये
३ अ. तदुग्र. ...
४ अ. प्रती 'गजमश्वं रथं सुरम' इतिस्यात्

चूर्णयामास तत्क्षिप्तं शतशोऽथ सहस्त्रधः ।।
ततः श्री सुराधिपः शक्रस्त्वाष्ट्रमस्त्र मुदैरयत् ।। ८५

संध्यमाने ततश्चास्त्रे निश्चेरुः पावकार्चिषः ।।
ततो यंत्रमया विद्याः प्रादुरासन्सहस्त्रशः ।। ८६

तैर्यं त्रैरभवद्धर्मंतरीक्षं वितारकम् ।।
तैर्यं त्रै मौशलं भग्नं हन्यंते श्च चासुरास्तदा[१] ।। ८७

शैलास्त्रं मुमुचे जंभी यंत्रसंधात चूर्णनम्[२] ।।
व्याम प्रमाणी रूपलैस्ततो वर्षः प्रवर्तत[३] ।। ८८

त्वाष्ट्रेण निर्मिताण्यासु यानि यंत्राणि भारत ।।
तेनोपल निपातेन गतानि तिलशस्ततः ।। ८९

ततः शिरस्सुदेवानां शिलाः पेतुर्महाजवाः ।।
दारयंत्यश्च वसुधां चतुरंगबलं च तत् ।। ९०

ततो वज्रास्त्रम करोत्सहस्त्राक्षः श्री पुरंदरः ।।
ततः शिलामहावर्षं व्यशीर्यत समंततः ।। ९१

---

१ अ. सुशस्ततः
२ अ. प्रतौ लौटनं पाठः ।
३ ते अ. पाठः

ततः प्रशांतैः शैलास्त्रैर्जंभो भूधरसन्निभः ।।
एषीकमस्त्र म करो चुर्णितान्य पराक्रमः ।। ९२

ऐषीकेणागमन्नाशं वज्रास्त्रं गिरिदारणम् ।।
विजृंभत्यथ चैषीके[1] परमास्त्रे ति दारुणे ।। ९३

जज्वलुर्देव सैन्यानि सस्यंदन गजानि च ।।
दह्यमानेष्वनीकेषु तेजसास्त्रस्य सर्वतः ।। ९४

आग्नेयमस्त्रम करोद्बलहा पाकशासनः ।।
तेनास्त्रेण च तन्नाशमैषीकम गम त्तदा ।। ९५

तस्मिन्प्रतिहते चास्त्रे चावकास्त्रं व्यजृंभृत ।।
जज्वाल सेना जंभस्य रथः सारथिरेव च ।। ९६

ततः प्रतिहतास्त्रो सौ दैत्येंद्रः प्रतिभानवान् ।।
चारुणास्त्रं मुमोचाथ शमनं पावकार्चिषाम् ।। ९७

ततो जलधरैर्व्योम ~~कम~~ स्फुरद्विद्युल्लताकुलैः ।।
गंभीराक्षसमाधारैश्छाभ्यपूर्यत मेदिनी ।। ९८

---

१ ब. कैषीके

करींद्रकर तुल्याभिर्धाराभिः पूरितं जगत् ।।
[1]शांतमाग्नेयमस्त्रं च विलोक्येंद्रश्चकार ह ।। ९९

वायव्यमस्त्रमतुलं तेन मेघा ययुः क्षयम् ।।
वायव्यास्त्रबलेनाथ [2]निर्धूते मेघमंडले ।। १००

बभूवानविलं[3] व्योम नीलोत्पदल प्रभम् ।।
वायुना चातिरूपेण कंपिताश्चैव दानवाः ।। १०१

न शेकुस्तत्र ते स्थातुं रणेऽपि बलिनोऽपिये ।। * ४
जंभस्ततोऽभवच्छैलो दशयोजन विस्तृतः ।। १०२

मारुतप्रतिघातार्थं दानवानां बलाधिपः ।।
नानाश्चर्य समायुक्तो नानाद्रुम लतावृतः ।। १०३

ततः प्रशमिते वायौ दैत्येंद्रे पर्वताकृतौ ।।
महाशनिं वज्रमयीं मुमोचाशु[5] शतक्रतुः ।। १०४

तयाशन्या पतितया दैत्यस्याचलरूपिणः ।।
कंदराणि व्यशीर्यंत समंतान्निर्झराणि च ।। १०५

---

१. शांत.. ......... च इदमर्धं अ पुस्तके लुप्तम् ।

२ निर्धूत.........ले ।। अ प्रतौ श्लोकार्धं नास्ति ।

३ ब. बभुनाविल

* ४ After the first line of the sloka No.102 there is written in the M.S.S. 'A'

- इति श्रीस्कंदपुराणे शक्रजंभयुद्धं ।।

Next sloka begins with - -नारद उवाच ।।

Which is not appear in the P.W.

५ ब. .....चाथ

ततः सा दानवेंन्द्रस्य शैलमायान्यवर्तते ।।
निवृत शैलमायो॑ऽथ दानवेंद्रो महोत्कटः ।। १०६

बभूव कुंजरो भीमो महाशैलमयाकृतिः ।।
ममर्द च सुरानीकं दंताभ्यां च हनत्सुरान् ।। १०७

बभंज पृष्ठतः कांश्चित्करेणा कृष्य दानवः ।।
ततः क्षपयतस्तस्य सुरसैन्यानि वृत्रहा ।। १०८

अस्त्रं[1] त्रैलोक्यदुर्धर्षं नारसिंह मुमोच ह[2] ।।
ततः सिंहसहस्त्राणि निश्चेरुर्मंत्र तेजसा ।। १०९

त्दृष्ठदंष्ट्राट्टहासानि क्रकचा भनखानि च ।।
तैर्विपाटितगात्रोऽसौ गजमायां व्ययोहयत् ।। ११०

ततश्चाशीविषो घारोऽभवत्फण समाकुलः ।।
विषानिःश्वास निर्दग्धसुर सैन्य महारथः ।। १११

ततोऽस्त्रं गारुडं चक्रे शक्रः संप्रहरन्रणे ।।
ततस्तस्माद्गरुमंतः सहस्त्राणि विनिर्ययुः ।। ११२

---

१ ब. अस्त्र
२ अ. प्रतौ नास्ति ।

तैर्गुरुम[1] द्रिमरासाद्य जंभं भुजंगरूपिणम् ।।
कृतस्तु खंडशो दैत्यः सास्य माया व्यनश्यत ।। ११३

मायायां च प्रनष्टायां[2] ततो जंभो महासुरः ।।
चकार रूपमतुल चंद्रादित्य पदानुगम् ।। ११४

विवृत नयनो ग्रस्तुमियेष सुरपुंगवान् ।।
ततोऽस्य प्राविशद्वक्त्रं समहारथ कुंजरा[3] ।। ११५

सुरसेनाऽ[4]भवद्भीमं पातालोत्तालतालुकम् ।।
सैन्येषु ग्रस्यमानेषु दानवेन बलीयसा ।। ११६

शक्रो दीनत्वमापन्नः श्रांतवाहन वाहनः ।।
कर्तव्यतां नाध्यगच्छत्प्रोवाचेदं जनार्दनम् ।। ११७

किमनंतरमेवास्ति कर्तव्यं नो विशेषतः ।।
तदादिश घटामोऽस्य दानवस्य युयुत्सतः ।। ११८

ततो हरिरुवाचेदं वज्रायुधमुदारधीः ।।
न सांप्रतं रणं त्याज्यं शत्रुकातर भैरवम् ।। ११९

---

१ ब. तैर्गुरुत्म
२ अ. प्रणष्टायां
३ अ. कुंजरः
४ अ. विशद्भीमं

मा गच्छ माहं मा गच्छ क्षिप्रमस्त्रंस्मर प्रभो ।।
नारायणास्त्रं प्रयतः श्रुत्वेति मुमुचे स च ।। १२०

एतस्मिन्नंतरे दैत्यो विवृतास्यो/ग्रसत्क्षणात् ।।
त्रीणि त्रीणि च [1]लक्षाणि किंनरोरगरक्षसाम्[2] ।। १२१

ततो नारायणास्त्रं च निपपातास्य वक्षसि ।।
महास्त्र भिन्नत्द्दयः सुस्त्राव रुधिरं[3] च सः ।। १२२

[4]ततः स्वतेजसा रूपं तस्य दैत्यस्य नाशितम् ।।
ततश्चांतर्दधे दैत्यः कृत्वा हासं महोत्कटम् ।। १२३

[5]गमनस्थः सदैत्येंद्रः शस्त्राश निमतींद्रियः ।।
मुमोच सुरसैन्यानां संहारकरणीं पराम् ।। १२४

तथा परश्वधांश्चक्र वज्रबाणान्समुद्गरान् ।।
कुंतान्खड्गान्भिंडिपाला नयोमुखगुंडा स्तथा ।। १२५

ववर्ष दानवो रोषादवध्यानक्षयानपि ।।
तैरस्त्रैर्दानवोन्मुक्तै र्देवानीकेषु भीषणैः ।। १२६

---

१ ब. "र"....
२ ब. राक्षसां
३ अ. स चः ।।
४ ततस्त्र तेजसा अ. ब. पाठः ।
५ अ. गमन

बाहुभिर्धरणी पूर्णा शिरोभिश्च सकुंडलेः ।।
ऊरुभिर्गज हस्ताभैः करीन्द्रैश्चाचलोपमैः ।। १२७

भग्नैषादंड चक्राक्षैः रथैश्च रथिभिः सह ।।
दुःसंचाराभवत्पृथ्वी मांस शोणित कर्दमा ।। १२८

रुधिरौघह्रतदावर्ता गजदेह शिलोच्चया ।।
कबंधनृत्य बहुला महासुर प्रवाहिनी[1] ।। १२९

श्रृगाल गृध्रध्वांक्षाणां परमानंद कारिणी ।।
पिशाच जातिभिः कीर्णा[2] पीत्वाऽमिर्षा सशोणितम् ।। १३०

असंभ्रमाभिमार्याभिः सह नृत्यद्भिरुद्धता[3] ।।
काचित्पत्नी प्रकुपिता गजकुंभात मौक्तिकैः ।। १३१

पिशाचो यत्र चाश्वानां खुरानिकत्र चाकरोत् ।।
कर्णपूरेषु मोदंते पश्यंत्यन्याः सरोषतः ।। १३२

प्रसादयंति बहुधा महाकर्णार्थि कोविदाः ।।
केचिद्वदन्ति भो देवा भो दैत्याः प्रार्थयामहे ।। १३३

---

१ ब. ..... नां ।।
२ अ. कीर्ण
३ .....अ. रुद्धतं

आकल्पमेवं यौद्धव्यमस्माकं तृप्ति हेतवे ।।
केचिद्‌दुरर्थं दैत्यौ देवोयमति मांसलः।। १३४

म्रियते यदि संग्रामे धातुर्दद्‌नौ/पयाचितम् ।।
केचिद्युध्यत्सु वीरेषु सृक्किणी संलिहंति च ।। १३५

एतेन पयसा विघ्नो दुर्जनः सुजनो[1] यथा ।।
केचिद्‌क्तन दीनां च[2] तीरे◌वास्तिकयबुद्धयः ।। १३६

पितृन्देवांस्तर्पयंति शोणितै◌ामिषैः * शुभैः ।।
केचिदामिषा राशिस्था दृष्ट्वान्यस्य करामिषाम् ।। १३७

देहिदेहीति वांशतो [3]धनिनः कृपणा यथा ।।
केचित्स्वयं प्रतृप्ता◌ दृष्ट्वा वे खादतः परान् ।। १३८

सरोषामोष्ठौ निर्भुज्य पश्यंत्यैवात्यसूयया[4] ।।
केचित्स्वमुदरं कृद्धा निर्दिंति[5] ताडयंति च ।। १३९

सर्व◌भक्षम भीप्संतस्तृप्ताः परधनं यथा ।।
केचिदाहुरद्य एव श्लाघ्या सृष्टिस्तुवेधसः ।। १४०

---

१ अ. प्रजनं ब. सुजना
२ तु अ पाठः ।
३ अ. कृपणा धनिनः इतिस्यात् ।।
४ अ ब. सूयतः
५ अ. निंदंतौ

सुप्रभातं सुनक्षत्रं पूर्वमासीद्धथैव तत् ।।
एवं बहुविधालापे पलादानां ततस्ततः ।। १४१

अदृश्यः समरे जंभो देवाञ्छस्त्रैरचूर्णयत् ।।
ततः शक्रो धनेशश्च वरुणः पवनोऽनलः ।। १४२

यमोऽथ निर्ऋतिश्चापि दिव्यास्त्राणि महाबलाः ।।
आकाशे मुमुचुः सर्वे दानवायाभिसंध्य तु ।। १४३

व्यर्थतां जग्मुरस्त्राणि देवानां दानवं प्रति ।।
यथातिक्रूरचितानामार्ये कृत्यशतान्यपि ।। १४४

गतिं न विविदुश्चापि श्रांता दैत्याश्च देवताः ।।
दैत्यास्त्र भिन्नसर्वांगा गावः शीतार्दिता इव ।। १४५

परस्परं व्यलीयंत हाहाकिंभावि वादिनः ।।
तामवस्थां हरिर्दृष्ट्वा देवांछक्रमुवाच ह[1] ।। १४६

अघोरमंत्रंस्मर देवराज अस्त्रं हि मत्पाशुपतप्रभावम् ।।
रुद्रेण तुष्टेन तव प्रदत्तमव्याहतं वीरवराभिधाति ।। १४७

---

१ ब. प्रतौ नास्ति

एवं स शक्रो हरिबोधितस्तदा[1] प्रणम्य देवं वृषाकेतुमीश्वरम् ।।
समाददे बाणममित्रघातनं संपूजितं देवरणे/र्धचंद्रम् ।। १४८

धनुष्यजय्ये विनियोज्य बुद्धिमान्नय
योजयतत्र अघोरमंत्रम् ।। १४९

ततोवधायाशु मुमोच तस्य वा आकृष्य
कर्णांतमकुंठदीधितिम् ।।
अथासुरः प्रेक्ष्य महास्त्रमापत द्विसृज्य मायां सहसा व्यवस्थितः ।। १५०

प्रवेपमानेनह मुखेन युज्यता चलेन गात्रेण च संभ्रमाकुलः
ततस्तु तस्यास्त्रवराभिमंत्रितः शरो/र्धचंद्रःप्रसभं महारणे ।। १५१

पुरंदरस्येष्वसन प्रमुक्तो मध्यार्क बिंब ~~क्र्~~ वपुषा विडंबयन् ।। १५२

किरीटकूटस्फुरकांति संकुलं[2] सुगंधिनानाकुसुमाधिवासितम् ।।
प्रकीर्णधूमज्वलनाभमूर्धजं न्यपातयज्जंभशिरः सकुंडलम् ।। * ३ १५३

तस्मिन्निंद्रहते जंभे प्रशशंसुः सुरा बहु ।।
वासुदेवो/पि भगवान्साधुसाध्विति चाब्रवीत् ।। १५४

---

१ ब. प्रतौ "दा" नास्ति ।

२ अ. ब. संकुटं

३ After the sloka No.153 there is written in the M.S.S.'A

इति श्री स्कंदपुराणे देवासुर युद्धे जंभ वधः ।।

Next sloka begins with -

नारद उवाच ।। Which is not in the P.W.

ततो जंभे हतं दृष्ट्वा दानवेन्द्राः पराङ्मुखाः ।।
सर्वे ते भग्नसंकल्पा दुद्रुवुस्तारकं प्रति ।। १५५

तांश्चत्रस्तान्समालोक्य श्रुत्वा स चतुरो हतान् ।।
सारथिं प्रेरयामास याहींद्रं लघु संगरे ।। १५६

तथेत्युक्त्वा स च प्रायात्तारके रथमास्थिते ।।
सावलेपं च[1] सक्रोधं सगर्वं सपराक्रमम् ।। १५७

साविष्कारं सधिक्कारं प्रयातो दानवेश्वरः ।।
स युक्तं रथमास्थाय सहस्त्रेण गरुमताम्[2] ।। १५८

सर्वायुध परिष्कारं सर्वास्त्र परिरक्षितम् ।।
त्रैलोक्य ऋद्धि संपन्नं कल्पांतांतकनादितम् ।। १५९

सैन्येन महता युक्तो नादयन्विदिशो दिशः ।।
सहस्त्राक्षश्च तं दृष्ट्वा त्यक्त्वा वाहनर्दतिनम् ।। १६०

रथं मातलिना युक्तं तप्तहेम परिष्कृतम् ।।
चतुर्योजन विस्तीर्णं सिद्धसंघ परिष्कृतम् ।। १६१

---

१ च अ प्रतौ नास्ति ।
२ गरुत्मतां अ. ब. पाठः ।

गंधर्व किंनरी दीगतमप्सरो नृत्य संकुलम् ।। १६२

सर्वायुध महाबाधं महारत्न समाचितम् ।।
१* अध्यतिष्ठत्तं रथं च परिवार्य समंततः ।। १६३

दंशिता लोकपालाश्च तस्थुः सगरुडध्वजाः ।।
ततश्चचाल वसुधा ववौ रुक्षो मरुद्गणो: [2] ।। १६४

चेलुश्च सागराः सप्त तथा/नश्यद्रवेः प्रभा ।।
ततो जज्वलुरस्त्राणि ततो/कंपंत वाहनाः ।। १६५

ततः समस्तमुद्वृत्तं ततोदृश्यत तारकः ।।
एकतस्तारको दैत्यः सुरसंधास्तथैकतः ।। १६६

लोकावसाद मेकत्र लोकोद्धरण मेकतः ।।
चराचराणि भूतानि भयविस्मयवंति च ।। १६७

प्रशशंसुः सुराः पार्थ तदा तस्मिन्समागमे ।। १६८

---

* १ तं रथं देवराजस्य परिवार्थ समंततः अ. ब. पाठः ।।
२ अ. ब. गणः

अस्त्राणि तेजांसि धनानि योधा यश्चैवबलं वीरपराक्रमाश्च ।।
सत्वौजसान्यंग बभूवरेषां देवासुराणां तपसः परं तु[1] नः ।। १६९

अथाभिमुखमायांतं देवा विनतपर्वभिः ।।
बाणैरनलकल्पाग्रैर्विव्यधुस्तारकं प्रति ।। १७०

स तानि चिंत्य दैत्येंद्रो देव[2]बाणक्षतान्त्ददि ।।
बाणैर्व्योम दिशः पृथुवीं पूरयामास दानवः ।। १७१

नारायणं च सप्तत्या नवत्या च हुताशनम् ।।
दशभिर्मारुतं मूर्ध्नि यमं दशभिरेवे च ।। १७२

धनदं चैव सप्तत्या वरुणं च तथाष्टिभिः[3] ।।
विंशत्या निर्ऋति दैत्यः पुनश्चाष्टभिरेवच ।। १७३

विव्याध पुनरेकैकं दशभिर्मर्मभेदिभिः ।।
तथा च मातलिं दैत्यो विव्याध त्रिभिराशुगैः ।। १७४

गरुडं दशभिश्चैव महिषं नवभिस्तथा ।।
पुनर्दैत्यो ऽथ देवानां तिलशो नवपर्वभिः ।। १७५

---

१ 'तु' अ प्रतौ नास्ति ।
२ अ प्रतौ 'सुर' इति स्यात् ।
३ तथाष्टभिः अ. ब. पाठः ।

चकार बर्मजालानि चिच्छेद च धनूर्षि[1] च ।।
ततो विकवचा देवा विधनुष्काः प्रपीडिताः ।। १७६

चापान्यन्यानि संगृह्य यावन्मुंचंति सायकान् ।।
तावद्बाणं[2] समाधाय कालाग्निल समप्रभम् ।। १७७

ताडयामास शक्रं स त्वदि सौपि मुमोच ह ।।
ततोंतरिक्षमालोक्य दृष्ट्वा सूर्यशताकृती ।। १७८

तार्क्ष्यविष्णु समाजघ्ने शराभ्यां तावमुह्यताम् ।।
प्रेतनाथस्य वह्नेश्च वरुणस्य शितैः शरैः ।। १७९

निऋतेश्चाकरोत्कार्यं भीतभीतं विमोहयत् ।।
निरुच्छ्वासं समात्दत्य चक्रे बाणैः समीरणम् ।। १८०

ततः प्राप्य हरिः संज्ञां प्रात्साहृय च दिशांपतीन् ।।
बाणेन सारथेः कायाच्छिरो हार्षीत्स कुंडलम् ।। १८१

धूमकेतोर्ज्वलत्कृद्धस्तस्य च्छित्वान्यपातयत् ।।
दैत्यराज किरीटं च चिच्छेद वासवस्ततः ।। १८२

---

१ ब. षि पाठः ।
२ अ. नेत्र

धनेशश्च धनुः क्रुद्धो बिभेद बहुधा शरैः ।।
वायुश्चक्रे च तिलशो रथं वा[1] [2]क्षाणिकूबरम् ।। १८३

निर्ऋतिस्तिलशो चर्म चक्रे बाणैस्ततो रणे ।।
कृत्वैतदतुलं कर्म तिष्ठतिष्ठेति चाब्रुवन् ।। १८४

लिहंतः सृक्किणीं देवा वासुदेवायस्तदा ।।
दृष्ट्वा तत्कर्म देवानां तारकोऽतुलविक्रमः ।। १८५

मुमोच मुद्गरं भीमं सहस्त्राक्षाय संगरे ।।
दृष्ट्वा मुद्गरमायांतम निवार्य रणाजिरे ।। १८६

रथादाप्लुत्य धरणीमगमत्पाक शासनः ।।
मुद्गरोऽपि रथोपस्थे पपात परुषास्वनः ।। १८७

स रथं चूर्णयामास न ममार च मातलिः ।।
गृहीत्वा पट्टिशं दैत्यो जघानोरसि केशवम् ।। १८८

स्कन्धे गरुमतः[3] सोऽपि [4]निषसाद विचेतनः ।।
खड्गेन राक्षसेन्द्रं च भित्वा भूमावयातयत् ।। १८९

---

१ चा अ. ब. पाठः
२ ब. क्षाणि.....
३ ब. गुरुत्मकः
४ अ. विष....

यमं च पातयामास भूमौ दैत्यौ[1]मुखे हतम् ।।
वह्निं च भिंडिपालेन[2] चक्रे हत्वा विचेतनम्[3] ।। १९०

वायुं पदा[4] तदाक्षिप्य पातयामास भूतले ।।
धनेशं तद्धनुष्कोटया कुट्टयामास कोपनः ।। १९१

ततो देवनिकायानामेकैकं क्षणमात्रतः ।।
तेषामेव जघानासौ शस्त्रैर्बालान्यथा गुरुः ।। १९२

लब्ध संज्ञस्ततो विष्णुश्चक्रं जग्राह दुर्धरम् ।।
दानवेंद्रवसामेदोरुधिरेणाभिरंजितम् ।। १९३

मुमोच दानवेंद्रस्य दृढं वक्षसि केशवः ।।
पपात चक्रं दैत्यस्य पतितं भास्करद्युति ।। १९४

व्यशीर्यताथ कायेऽस्य नीलोत्पलमिवाश्मनि ।।
ततो वज्रं महेन्द्रोऽपि प्रमुमोचार्चितं चिरम् ।। १९५

तस्मिंजयाशाशक्रस्य दानवेन्द्राय संयुगे ।।
तारकस्य च संप्राप्य शरीरं शौर्य शालिनः ।। १९६

---

१ मुखंडिना अ. पाठः ।
२ अ. मालेन
३ अ. विचेतसं
४ अ. पाद

विशीर्यत[1] विकीर्णार्चिः शतधा खंडशो[2]गतम् ।।
ततो वायुरुदीनात्मा वेगेन महता नदन्[3] ।। १९७

ज्वलितज्वलना भासमंकुशं प्रमुमोच ह ।।
विशीर्ण तस्य तच्चांगे दृष्ट्वा वायुर्महारुषा ।। १९८

ततः शैलेन्द्रमुत्पाप्य पुष्पितद्रुम कंदरम् ।।
चिक्षेप दानवेन्द्राय दशयोजन विस्तृतम् ।। १९९

महीधरं तमायांतं सस्मितं दैत्यपुंगवः ।।
जग्राह वामहस्तेन वालः कन्दुकलीलया ।। २००

ततस्तेनैव चाहत्य पातयामास चांतकम् ।।
दण्डं ततः समुद्यम्य कृतांतः क्रोध मूर्छितः ।। २०१

दैत्येन्द्र मूर्घ्नि चिक्षेप भ्राम्य वेगेन दुर्जयम् ।।
सोऽसुरस्यापतन्मूर्घ्नि दैत्यस्तं जगृहे स्मयन् ।। २०२

~~कल्पमं~~ कल्पांत लोकदहनो ज्वलनो रोषसंज्वलन् ।।
शक्तिं चिक्षेप दुर्धर्षां दानवेन्द्राय[4] संयुगे ।। २०३

---

१ अ. व्यशीर्यत
२ अ. शोभनं
३ ब. नदत्
४ ब. यं

ततः शिरीषमालेव[1] सास्य वक्षस्य राजत् ।।
ततः खड्गं समाकृष्य कोशादाकाश निर्मलम् ।। २०४

द्युतिभासित त्रैलोक्यं लोकपालोऽपि निमर्कृतिः ।।
चिक्षेप दानवेन्द्राय तस्य मूर्घ्नि पपात ह[2] ।। २०५

पतितश्चागमत्खड्गः स शीघ्रं शतखण्डताम् ।।
जलेशश्च ततः क्रुद्धो महाभैरव रूपिणम् ।। २०६

मुमोच पाशं दैत्येन्द्र भुज बन्धाभिलाषुकः ।।
स दैत्य भुजमासाद्य पाशः सद्यो व्यपद्यत ।। २०७

स्फुटितः क्रकचक्रूर दशनालिरहीश्वरः ।।
ततोऽश्विनौ सचंद्रार्कौ साध्याश्च वसवश्चये ।। २०८

यक्षराक्षसगन्धर्वाः [3]सर्पाश्चास्त्रैः पृथग्विधैः ।।
जघ्नुर्दैत्येश्वरं सर्वे भूयशस्ते महाबलाः ।। २०९

न चास्त्राण्यस्यासज्जन्त गात्रे वज्राच लोपमे ।।
ततो देवानवप्लुत्य तारको दानवाधिपः ।। २१०

---

१ अ. शरीष ब सरीष
२ अ. प्रतौ "च" पाठः ।
३ सर्वा अ. ब. पाठः ।

जघान कोटिशः क्रुद्धो मुष्टिपार्ष्णि भिरेव च ।।
तथाविधं तस्य वीर्यमालोक्य भगवान्हरिः ।। २११

पलायध्वमहो देवा वदन्नतर्हितो भवत् ।।
शक्रादयस्ततो देवाः पलायन कृतादशः ।। २१२

कालनेमि[१] मुखैर्दैत्यै रुपरुद्धा महोत्कटैः ।।
मुष्टिभिः पादघातैश्च केशेष्वा कृष्यतैर्मुदा ।। २१३

तारिताः शुष्कसरितं देवमार्गाश्च दर्शिताः ।।
बहुधा चाप्यकृष्यतं लोकपाला महासुरैः ।। २१४

ततो निनादः संजज्ञे दैत्यानां बलशालिनाम् ।।
कम्पयन्पृथ्वीं द्यां च पातालानि च भारत ।। २१५

जयेति मुदिता दैत्यास्तुष्टुवुस्तारकं तदा ।।
शंखाश्च पूरयामासुः कुन्देन्दुसदृशप्रभान् ।। २१६

[२]धुनर्बाणरवांश्चाग्रान्कराघातांश्च चक्रिरे ।।
भृशं हर्षान्विता दैत्या नेदुश्च ननृतुर्मुहुः ।। * ३ २१७

---

१ ब. कल

२ ब. धनुर्बाण....

* ३ After this, there is written in the M.S.S.A'

इति श्री स्कंदपुराणे कुमारिकाखंडे सुरबंधः ।।

Next sloka begins with the words -

- नारद उवाच ।।

ततो देवान्पुरस्कृत्य पशुपालः[1] पशूनिव ।।
दैत्येन्द्रो रथमास्थाय जगाम सहितो सुरैः ।। २१८

महीसागर कूलस्थं तारकः[2] स[3] पुरं बली ।।
योजनद्वादशायामं ताम्रप्राकार शोभितम् ।। २१९

प्रासादैर्बहुभिः कीर्णं दिव्याश्चर्यपिशोभितम् ।।
यत्र शब्दास्त्रयो नैव जीर्यंते चानिशं पुरे ।। २२०

गीतघोषश्च व्याघोषो भुज्यंतां विषयास्त्यिति ।।
तत्प्रविश्य पुरं राजा जगाम स्वकमालयम् ।। २२१

महोत्सवेन महता पुत्र स्त्री प्रति नंदितः ।।
तत्र दिव्यां सभां[4] राजा प्राप्य सिंहासन स्थितः ।। २२२

स्तूयमानो दिति सुतैरप्सरोभिर्विनोदितः ।।
दिव्यासनस्थै दैत्येंद्रैर्वृतः सिंहैरिव प्रभुः ।। २२३

एतस्मिन्नंतरे काचि दिव्यस्त्री तत्पुरे भवत् ।।
विस्मतस्तैर्वृतो दैत्यैः प्रोवाचेदं स्मयन्निव ।। २२४

---

१ ब. पाशुपाल
२ अ. ब. तारक
३ "स" अ. ब. हस्तप्रत्योः नास्ति ।
४ "प्राप्यराजा" अ. प्रतौ इत्ययं पाठः ।।

रूपेणानुपमा पार्थ नानाभरण भूषिता ।।
तां दृष्ट्वा तारको राजा भृशं वै विस्मितोभवत् ।। २२५

१ * कासि देवि मम ब्रूहि किं मया रूपसुंदरि ।।
त्वत्समां योषितं नैव दष्टवंतः पुरा वयम् ।। २२६

स्त्र्युवाच ।।[२]
अहंत्रैलोक्य लक्ष्मीति विद्धि मां दैत्यसत्तम् ।।
अर्जिता तपसा चास्मि त्वया वीर्येण वा विभो ।। २२७

वीर्यवंत त्वनलसं तपस्विनमकातरम् ।।
दातारं चापि भोक्तारं युक्त्वा सेवामि तं नरम् ।। २२८

भीरुं निर्विण्णामत्यर्थं साध्वीपीडा करं नरम् ।।
सर्वाति शंकिनं सद्यस्त्यजामि दिति नंदन ।। २२९

महेंद्रेण च माता ते यदा सा व्यपमानिता ।।
तदैव त्यक्तप्रयो सा विदानीं तव संवशे ।। २३०

तारकश्च ततः प्राह परमं चेति तां तदा ।।
सा चाविवेश तं देवी [३]त्रिजगत्पूजिता रमा ।। २३१

---

* १ The sloka No.226 begins with the words - तारक उवाच ।। in the M.S.S.'A'

२ ब. स्त्री उवा० ।।

३ अ. प्रतौ "जगत्त्रिपूरितामा ।। इतिस्यात्

ततो दैत्याधिपं नार्यो दानवानां विभूषिताः ।।
वीरकांस्यमुपादाय वर्धयां चक्रिरे मुदा ।। २३२

देवाश्च द्वारि तिष्ठंति बद्धा दैत्यै भृशातुराः ।।
उपहस्यमाना नारीभिर्दैत्यैरन्यैश्च नागरैः ।। २३३

एतस्मिन्नंतरे विष्णुर्दैत्य रूपं समास्थितः ।।
उपहास कमध्यस्थो गाथे द्वे प्राह बुद्धिमान् ।। २३४

इदमल्प‿तरंनाम यदमीषां च दृश्यते ।।
मातृक्रोधं[1] स्मरन्राजा[2] किं किं यन्न करिष्यति ।। २३५

बलीयांसं समासाद्य न नमेद्या न चास्ति सः ।।
क मर्कवच्छ्वेत बाकीयैरुपायैः स्थीशतां सुराः ।। २३६

उपहासमुखेनामी उपदेशं हरेर्मुखात् ।।
समाकर्ण्य ततो देवा मर्कटरूपेण संस्थिताः ।। २३७

नृत्यंतस्ते च बहुधा दैत्याश्चासुरयोषितः ।।
भृशं च[3] मोदयामासुर्मुदा भोज्यानि ते ददुः ।। २३८

---

१ अ. कोपं

२ ते स्मरन् राजा ब. पाठः ।

३ अ. ब. पुस्तेकेषु नास्ति ।

विष्णुर्दैत्य प्रतीहारं ततः प्रोवाच बुद्धिमान् ।।
विनोदाय महाराज्ञो मर्कनितान्प्रकीर्तय ।। २३९

प्रतीहारस्ततो त्दृष्टः सभा मध्ये[1] विवेश सः[2] ।।
जानुभ्यां धरणीं गत्वा बद्धा च करसंपुटम् ।। २४०

उवाचानाविलं[3] वाक्यमल्पा क्षरपरिस्फुटम् ।।
दैत्येंद्र मर्कवृंदानि द्वारि तिष्ठंति ते प्रभो ।। २४१

भृशं विनोदकारीणि स्पृहा चेद्दृष्टुमर्हसि ।।
तन्निशम्या ब्रवीद्राजा किं चिरं क्रियते त्वया ।। २४२

क्षत्ता चेति वचः श्रुत्वा कालनेमिं तदाब्रवीत् ।।
मर्कनितान्महाराजो दृष्टुमिच्छति शीघ्रतः ।। २४३

रक्षपाल सहैभिस्त्वं राजानमनुकूलय ।।
कालनेमि रुपादाय मर्कान्यातो नृपं ततः ।। २४४

मर्कमध्ये विष्णुमर्कौ यातस्त्यक्त्वा च दैत्यताम् ।।
ततस्तारक दैत्यस्य पुरतो ननृतुर्भृशम् ।। २४५

---

१ ब. मध्यं
२ अ. प्रतौ "च" पाठः
३ ब. खिलं

मर्का दैत्य करोतालि हर्षनाद[1] विनोदितैः ।।
ततोऽति मुदितो राजा तेषां नृत्येन सोऽब्रवीत् ।। २४६

अभयं वो मर्कदेवास्तुष्टो यच्छाम्यहं त्विदम् ।।
मद्गृहे स्थीयतामिव न च कार्यं भयं त्वदि ।। २४७

इति श्रुत्वा विष्णुमर्कः प्रतृत्यन्निदम ब्रवीत् ।।
राजन्विज्ञातुमिच्छामस्तव गेहावधिं वयम् ।। २४८

एवमुक्ते प्रहस्याह तारको दैत्यसत्तमः ।।
त्रिभूमिकं हि मे गेहमिदं यद्भुवनत्रयम् ।। २४९

हरिमर्कस्ततः प्राह यद्येवं स्वं वचः स्मर ।।
त्रैलोक्ये विचरंत्वेते मर्का राजन्सुनिर्भयाः ।। २५०

अश्वमेधशतस्यापि सत्यं राजन्विशिष्यते ।।
धर्ममेनं[2] स्मरन्सत्यं वचनं [3]कुरु दैत्यप ।। २५१

ततः सुविस्मितो दैत्यः प्राहेदं वचनं तदा[4] ।।
मर्कटाहो प्रबुद्धोऽसि सत्यं ब्रूहि च को भवान् ।। २५२

---

१ अ. सिंहनाद
२ अ. ....मेवं
३ ब. वचने
४ अ. मुदा

श्री भगवानुवाच ।।[1]

अहं नारायणोनाम यदि श्रीत्रभुपागतः ।।
देवानां रक्षणार्थाय मर्करूपमुपाश्रितः ।। २५३

तच्चेन्मान्यतमो धर्मस्तव तद्वचनं स्वकम् ।।
परिपाल्य ते गेहं विचरंतु सुरास्त्वमी[2]।। २५४

अवलेपश्च राजेन्द्र न कर्तव्यस्त्वया त्वदि ।।
वीरोऽहमिति संचिन्त्य पश्यता कालजंबलम् ।। २५५

पर्यायैर्हन्यमानानाम भि हंता न विद्यते ।।
मौढ्यमेतत्तु यद्वेष्टा कर्ताहमिति मन्यते ।। २५६

ऋषींश्च देवांश्च महासुरांश्च त्रैविधवृद्धांश्च वने मुनींश्च ।।
कं [3]चापदो नोपनमंति काले कालस्य वीर्यं न तु कर्तुरेतत् ।। २५७

न मंत्रबलवीर्येण प्रज्ञया पौरुषेण वा ।।
अलभ्यं लभ्यते[4] काले काले सुप्तोऽपि विंदति ।। २५८

न मातृपितृशुश्रूषा न च दैवत पूजनम् ।।
नान्यो गुणसमाचारः पुरुषस्य सुखावहः ।। २५९

---

१ अ. पुस्तके एतत्स्थाने "हरिमर्कट उवाच" पठ्यते

२ ब. सुवा

३ अ. नापदो

४ ब. लभते

न विद्या न तपो दानं न मित्राणि न बांधवाः ।।
शक्नुवंति परित्रातुं नरं कालेन पीडितम् ।। २६०

नागामिगमनार्थं हि प्रतिघात शतैरपि ।।
शक्नुवंति प्रतिव्योढुमृते कालबलं नराः ।। २६१

देहवत्पुण्यकर्माणि जीववत्काल उच्यते ।।
द्वयोः समागमे दैत्य कार्याणां सिद्धिरिष्यते ।। २६२

अहो दैत्य त्वद्विशिष्ठा दैत्यानां कोप्यः पुराः ।।
शाल्मलेस्तूलवत्क्षिप्ताः कालवातेन दुर्दशाः ।। २६३

इदं तु लब्ध्वा त्वं स्थानमात्मानं बहुमन्यसे ।।
सर्वभूतभवं देवं ब्रह्माणामिव[1] शाश्वतम् ।। २६४

न देवमचलं स्थानमनंतं चापि कस्यचित् ।।
त्वं तु बालिशया बुद्धया ममेदमिति मन्यसे ।। २६५

अविश्वास्ये विश्वसिषि मन्यसे चा/ध्रुवम् ।।
[2]ममेदमिति मोहात्वं त्रिलोकीश्रियमीप्ससि ।। २६६

---

१ मिति - अ. ब. पाठः ।
२ ब. "ध्रुवं" अत आरंभ्येते ।

नेयं तव न चास्माकं न चान्येषां स्थिरामता ।।
अतिक्रम्य बहूनन्यांस्त्वयि तावदियं स्थिता ।। २६७

किंचित्कालमियं स्थित्वा त्वयि तारक चंचला ।।
पुंश्चलीवाति चपला पुनरन्यं गमिष्यति ।। २६८

सरत्नौषधिसंपन्नं ससरित्पर्वताकरम् ।।
तानिदानीं न पश्यामि वैर्भुक्तं भुवनत्रयम् ।। २६९

हिरण्यकशिपुर्वीरो हिरण्याक्षश्च दुर्जयः ।।
*[1]प्रहलादो नमुचिर्वीरो विप्रचितिर्विरोचनः ।। २७०

कीर्तिः शूरश्च वीरश्च वातापिरिल्वलस्तथा ।।
अश्वग्रीवः शंबरश्च पुलोमा मधुकैटभौ ।। २७१

विश्वजित्प्रमुखाश्चान्ये दानवेंद्रा महाबलाः ।।
कालेन[2] ~~निहताः~~ निहताः[3] सर्वे कालो हि बलवत्तरः ।। २७२

सर्वैर्वर्षायुतं तप्तं न त्वमेको महातपाः ।।
सर्वे सत्यव्रतपराः सर्वे चासन्बहुश्रुताः ।। २७३

---

१ * प्रह......चनः । अ. प्रतौ श्लोकपंकित नास्ति ।
२ कालेना अ. ब. पाठः ।
३ अ. ब. भिहताः ।

सर्वे यथार्हदातारः सर्वे दाक्षायणी सुताः ।।
ज्वलंतः प्रजयंतश्च[1] कालेन प्रति संहताः ।। २७४

मुंचेच्छां कामभोगेषु मुंचेमं श्रीभवं मदम् ।।
एतदैश्वर्यनाशे त्वां शोकः संपीडयिष्यति ।। २७५

शोककाले शुचोमात्वं हर्षकाले च मा हृषः ।।
अतीताऽनागते हि त्वा प्रत्युत्पन्नेन वर्तय ।। २७६

इंद्रं चेदागतः कालः सदा युक्तमत द्रितम् ।।
क्षमस्य न चिरादैत्य त्वामप्युपगमिष्यति ।। २७७

को हि स्थातुमलं लोके ममक्रुद्धस्य संयुगे ।।
कालस्तु बलवान्प्राप्तस्तेन तिष्ठामि[2] तारक ।। २७८

त्वमेव वेत्सि मां दैत्य योहं यादकपराक्रमः ।।
कल्पेकल्पे[3] महादैत्याः कोटिशोऽर्बुदशो हताः ।। २७९

येषां त्वं कोटिभागेऽपि परिपूर्णो न तारक ।।
कल्पे कल्पे सृजामीदं ब्रह्मादि सकलं जगत् ।। २८०

---

१ अ. प्रतपतश्च
२ अ. ब. तिष्टसि
३ अ प्रतौ नास्ति ।

इच्छन्संजीवयाम्येव तदनिच्छन्नाशये क्षणात् ।।
[1]न हि त्वां नोत्सहे हंतुं सर्वदैत्य समायुतम् ।। २८१

अंगुल्यग्रेण दैत्येंद्र पुनर्धर्मं न लोपये ।।
यद्य हं प्रवरो भूत्वा धर्मं ब्रह्मवरात्मकम् ।। २८२

लोपयामि ततः कश्च धर्मोऽयं शरणं व्रजेत् ।।
अहं कर्तेति मामंस्थाः कर्तायस्तु सदा प्रभुः ।। २८३

सोऽयं कालः पचेद्विश्वं वृक्षे फलमिवागतम् ।।
तैरेव कर्मभिः सौख्यं दुःखं तैरेव कर्मभिः ।। २८४

प्राप्नोति पुरुषो दैत्य पश्य कालस्य चित्रताम् ।।
सर्वं कालवशादेव बोद्धव्यं धीर्यु तैर्नरैः ।। २८५

स्वकर्म परिपाकस्य फलदं वै[2] विदुर्बुधाः ।।
तस्मात्कर्म शुभं[3] कार्यं पुण्यात्पुण्यात्मकं[4] च यत् ।। २८६

पुण्येन तत्र सौख्यं स्यादुःखं पापेन निश्चितम् ।।
इति संचिंत्य दैत्येंद्र स्वं वचः परिपालय ।।
मदुक्तं वचनं सर्वं यदि मंतुमिहार्हसि ।। २८७

---

१ ब. सहि
२ ब. प्रतौ "तं" पाठः ।
३ अ. प्रतौ "दृढं" इति स्यात् ।
४ अ. तत् ब. जगत्

तारक[1] उवाच ।।

मामत्र संस्थितं दृष्ट्वा कालनेमि मुखैर्युतम् ।। २८८

कस्येह न ~~व्यथेद्~~ व्यथेद्बुद्धिर्मृत्योरपि जिघांसतः ।।
सा तेन व्यथेत बुद्धिस्चला तत्त्वदर्शिनी ।। २८९

ब्रवीषि यद्यत्त्वं वाक्यं तत्तथैव न संशय ।।
को हि विश्वासमर्थेषु शरीरे वा शरीर भृत् ।। २९०

कर्तुमुत्सहते लोके दृष्ट्वा संप्रस्थितं जगत् ।।
अहमप्येव मैवैनं लोकं जानाम्यशाश्वतम् ।। २९१

कालागुनावाहितं घोरे गुह्वे सतत गत्वरे ।।
इदमद्य करिष्यामि श्वः कर्तास्मीतिवादिनः ।। २९२

कालो हरति संप्राप्ते[2] नदी वेग इयोन्मुखान् ।।
इदानीं तावदेवासौ मया दृष्टौ[3] न विस्मृतः[4] ।। २९३

कालेन ह्रियमाणानां प्रलापः श्रूयते नृणाम् ।।
इर्ष्याभिमान लोभेषु काम क्रोध भयेषु च ।। २९४

---

१ ब. उ० ।।

२ अ. ब. तौ

३ अ. ब. दृष्टः

४ अ. ब. पुस्तैकेषु एतस्थाने कथंमुतः पठयते

स्पृहामोहातिवादेषु लोकः सक्तो न बुध्यते ।।
गुरुं वाप्यगुरुं वापि कृत्याकृत्यं च केशव ।। २९५

जानामि त्वामहं विष्णो सर्वभूतवरं प्रभुम् ।।
किं कुर्मः स्वस्व भावेन बलिना त्वां न मन्महे ।। २९६

केचिद्भजंति त्वां भक्तया वैरेण हेलया परे ।।
सर्वेनुकंप्यास्ते तुभ्यमंतरात्मासि देहिनाम् ।। २९७

पुराणः शाश्वतो धर्मः सर्वप्राणभृतां समः ।।
मामालंब्य[1] मया मुक्ता यांतु सर्वे दिवौकसः ।। २९८

पुनर्मर्कस्वरूपेण भ्रांतव्यं भुवनत्रयम्[2]।।
स्पृहापि यज्ञभागानां न कार्या समयस्त्वयम् ।। २९९

एवमुक्ते तारकेण देवा हर्षं प्रपेदिरे ।।
मुच्यते त्वदतलोमापिमेषो लाभो हि सौनिकात् ।। ३००

श्री भगवानुवाच ।।[3]
दैत्येंद्र भव तत्वज्ञो विद्याज्ञान तपोन्वितः ।।
कालं पश्यसि[4] सुव्यक्तं पाणावामलकं यथा ।। ३०१

---

१ अ. ब. तमा

२ अ. ब. त्रये

३ अ. श्री विष्णुरुवाच ।।

ब. श्री भगवानु॰ ।।

४ अ. मि पाठः

काल चारित्र तत्वज्ञः शिवभक्त महामते ।।
वज्रांगसुत धन्योऽसि स्पृहणीयोऽसि धीमताम् ।। ३०२

यावत्ते तपसो वीर्य तावद्भुक्ष्व जगत्त्रयम् ।।
एतेन समयेनैते चरिष्यंति सुरा जगत् ।। ३०३

इत्युक्त्वा मर्कयूथेन वृतो नारायणः प्रभुः ।।
स्थानादस्मादपाक्रम्य मेरुं प्रति ययौ तदा ।। ३०४

ततो मेरुं समागम्य प्रोवाच वचनं[1] हरिः ।।
भवंतो यांतु ब्रह्माणं स धास्यति च वो हितम् ।। ३०५

अप्रमत्तैः[2] सदा भाव्यं पालयध्वं समयस्तथा ।।
इत्युक्त्वा भगवान्विष्णुस्तत्रैवांतरधीयत ।। ३०६

प्रणताः संस्तुतो देवैर्ब्रह्माणं च सुरा ययुः ।। ३०७

दिव्योत्तमैस्तत्र गतिरधिष्टुतो विदीप्ततेजाभुवन त्रयेऽपि ।।
वज्रांगपुत्रोऽपि मुमोद वीरः शिवप्रसादेन महर्द्धिमाप्य ।। ३०८

स्तम्भश्च निर्ऋतिस्थाने महिषो वरुणस्तथा ।। ३०९

मेषो वातां[3]धिकारी च कुंभो धनदोऽभवत् ।।
अन्येषां चाधिकारांश्च दैत्यानां तारको ददौ ।। ३१०

*४ इति श्री स्कांदे......... देवासुर संग्रामे तारकविजय वर्णनंनामैकविंशति तमोऽध्यायः ।।

---

१ ब. वचन
२ अ. प्रतौ नास्ति ।
३ ब. माता
* ४ अ. इति श्री स्कंदपुराणे कुमारिकाखंडे तारक विजयः ।।
ब. इति श्री स्कंदपुराणे कुमारिकाखंडे तारक विजयः एकविंशोऽध्याय